धि सकारे सिचो लोपश्चकाद्धीति प्रयोजनम् ।
आशाध्वं तु कथं जश्त्वं सकारस्य भविष्यति ॥

सर्वमेवं प्रसिद्धं स्याच् छ्रुतिश्चापि न भिद्यते ।
लुङश्चापि न मूर्धन्ये ग्रहणं सेटि दुष्यति ॥

घसिभसोर्न सिध्येत तस्मात् सिज्ग्रहणं न तत् ।
छान्दसो वर्णलोपो वा यथेष्कर्तारमध्वरे[1] ॥ (म. भा. ३. ४०३)

निष्कर्तारमध्वरस्य (तै. ४. २. ७. ३) इत्येवं प्राप्ते ॥

## झलो झलि । (२६/२२८१)

झलः उत्तरस्य सकारस्य झलि परतो लोपो भवति अभित्त । अभित्थाः । अच्छित्त । अच्छित्थाः । अवात्ताम्, अवात्त इत्यत्र वा सिचः [2]सकारलोपस्यासिद्धत्वात् 'सः स्यार्धधातुके' (७. ४. ४९/२३४२) इति सकारस्य तकारः । झलः इति किम् ? [3]अमंस्त । अमंस्थाः । झलि इति किम् ? अभित्साताम् । अभित्सत । अयमपि सिच एव लोपः, तेनेह न भवति, [4]सोमसुत् स्तोता, [5]दृषत्स्थानम् इति ॥

## ह्रस्वादङ्गात् । (२७/२३६९)

ह्रस्वान्तादङ्गादुत्तरस्य[6] लोपो भवति झलि परतः । अकृत । अकृथाः । अहृत । अहृथाः । ह्रस्वात् इति किम् ? अच्योष्ट । [7]अप्लोष्ट । अङ्गात् इति किम् ? [8]अलाविष्टाम । अलाविषुः । झलि इत्येव, अकृषाताम् । अकृषत । अयमपि सिच एव लोपः, तेनेह न भवति, [9]द्विष्टराम्, द्विष्टमाम् इति । सुजन्ताद् द्विशब्दात्तरप्तमपौ[10], अद्रव्यप्रकर्षे [11]आतिशयिकः आम् प्रत्ययः ॥

## इट ईटि । (२८/२२६६)

इटः उत्तरस्य [12]सकारस्य लोपो भवति ईटि परतः । [13]अदावीत् । अलावीत् । असेवीत् । अकोषीत् । अमोषीत् । इटः इति किम् ? अकार्षीत् । अहार्षीत् । ईटि इति किम् ? अलाविष्टाम् । अलाविषुः ॥

---

1. इष्कर्तारमध्वरस्य ऋ. 10. 140. 5. 2. इति वसेः सकारस्य लोपस्य क. इ. ड. 3. अभैत्सुः इत्यधिकम् ड. 4. सोमस्रुत् स्तोम ह. 5. दृषत्स्थानम् नास्ति इ. ब. 6. सकारस्य इत्यधिकम् ब. क, सस्य इत्यधिकम् इ. क. 7. नास्ति इ. 8. अपाविष्टाम् अपाविपुः ड. 9. द्विष्टराम् नास्ति क. 10. द्रष्टव्यौ इत्यधिकम् इ. क. 11. आतिशयिकः नास्ति इ. क. 12. सिचः इत्यधिकम् ब. ड. 13. अवैदीत् इ.